अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# कारकस्वरूपविमर्शः

**दिनेशकुमारद्विवेदी**

तत्र ''**वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः**''[१] इति भट्टोजिदीक्षितवचनप्रामाण्यात्, '**तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधजनकत्वात् तेनैवार्थसमाप्तेश्चेति**'[२] इति नागेशभट्टवचनप्रामाण्याच्च वाक्यस्यैव प्राधान्यम्। वाक्यञ्च सर्वमपि कारकेणानुविद्धमेवानुभूयते। अतः कारकस्य कीदृशं स्वरूपमिति जिज्ञासा समुदेति। तत्र किन्नाम कारकत्वमित्यत्र मतभेदो दरीदृश्यत आचार्याणाम्। अत्र तेषां समेषामाचार्याणां मतानि क्रमेणोपस्थाप्यन्ते ।

### पतञ्जलिमतम्

तत्र यद्यपि श्रीमता पाणिनिना कारकस्य किमपि लक्षणं नैव प्रतिपादितम्। किन्तु '**कारके**'[३] इति सूत्रितम् । तत्र श्रीमता पतञ्जलिना 'कारके' इति सूत्रं '**प्रत्ययः**'[४] इत्यादिवत् सञ्ज्ञाधिकारत्वेन प्रतिपादितम् । तथा चोक्तं भाष्ये ''किमिदं 'कारके' इति ? कारक इति सञ्ज्ञानिर्देशः... सञ्ज्ञाधिकारश्चायम्। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः सञ्ज्ञाया[५] इति।' किन्तु लघ्वर्थं हि सञ्ज्ञाकरणमिति सिद्धान्तसत्वेऽपि 'कारक' इति महासञ्ज्ञाकरणात् तत्र केनापि विशिष्टार्थेनावश्यमेव भाव्यम्। अत एवोक्तं भाष्ये ''कारक इति महती सञ्ज्ञा क्रियते, सञ्ज्ञा च नाम यतो न लघीयः, तत्र महत्याः सञ्ज्ञायायाः करणे एतत्प्रयोजनमन्वर्थसञ्ज्ञा यथा विज्ञायेत[६] करोतीति कारकमिति। तत्र करोतीत्यस्य क्रियां निर्वर्तयति साधयतीत्यर्थः, अतएव तद्व्याख्यानं कुर्वता कैयटेनोक्तं ''साध्यत्वेन क्रियैव शब्दात् प्रतीयत[७] इति क्रियायाः निर्वर्तकस्य कारकसञ्ज्ञाऽपादानादिसञ्ज्ञा च प्रवर्तते। भाष्येऽप्युक्तम्— ''सामान्यभूता क्रिया वर्तते तस्या निर्वर्तकं कारकमिति[८]'' तस्मात् क्रियानिर्वर्तकत्वं कारकत्वमिति पतञ्जलिसम्मतमस्ति। अत्रैव पाणिनिकात्यायनयोरपि तात्पर्यम्।

---

[१] वैयाकरणभूषणसारः, कारिका सं ६१
[२] परमलघुमञ्जूषा, पृ० ६
[३] पा०सू० १/४/२३
[४] पा०सू० ३/१/१
[५] महाभा० १/४/२३, पृ० २४०
[६] महाभा० १/४/२३, पृ० २४२
[७] महा०भा० प्रदीपः १/४/२३ पृ० २४२
[८] महाभा० पा०सू० १/४/२३

ननु करोतीति कारकमिति अन्वर्थसञ्ज्ञास्वीकारे स्वतन्त्रस्यैव कर्तृसञ्ज्ञावत् कारकसञ्ज्ञाऽपि प्राप्नोति न तु करणाधिकरणादीनां कर्तृपरतन्त्राणा[९]मिति विचारणायामुच्यते स्वव्यापारे सर्वेषां स्वातन्त्र्यात् तदनुष्ठानद्वारेण प्रधानक्रियोपयोगितया यदा यस्य स्वातन्त्र्यं विवक्षितं तदा तस्य कर्तृत्वम्।

**अयम्भावः** - यदधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते तत्र तदा पचिर्वर्तते एष प्रधानकर्तुः पाकः एतत् प्रधानकर्तुः कर्तृत्वम्। एवं सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते तत्र तदा पचिर्वर्तते, एषोऽधिकरणस्य पाकः। एतदधिकरणस्य कर्तृत्वम्।[९]

एवमेधाः पक्ष्यन्त्याविक्लित्तेर्ज्वलिष्यतीति ज्वलनक्रियां कुर्वन्ति काष्ठानि काष्ठानि पचन्तीत्युच्यते। तत्र तदा पचिर्वर्तते, एतत्करणस्य कर्तृत्वम्। एवमेवान्यत्रापि बोध्यम्। तथा च विवक्षातः कारकाणि भवन्तीति सिद्धान्तात् सर्वत्रैव स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितमिति तयोः पर्यायेण कार्यं सेत्स्यति। स्वातन्त्र्यविवक्षायां कर्तृत्वम्, पारतन्त्र्यविवक्षायामन्यत् करणत्वादिकम्।

### भर्तृहरिमतम्

क्रियासिद्धौ कारणरूपा द्रव्यशक्तिः, साधनशब्देन कारकशब्देन वोच्यते। साध्यतेऽनेन क्रियेति साधनशब्दस्य करोति क्रियामिति कारकशब्दस्य च व्युत्पत्तेः। तथा चोक्तं भर्तृहरिणा **वाक्यपदीये**—

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ॥**[१०]

अयम्भावः — क्रियायाः आश्रये आश्रयान्तरे वा समवेतानां क्रियाणां सिद्धौ यत् सामर्थ्यं तदेव साधनं ज्ञेयम्, साध्यते क्रिया अनेनेति व्युत्पत्त्या साधनशब्देन कारकं गृह्यते। अतः शक्तिः कारकमिति पक्षः समायाति।

तत्र कर्तृत्वशक्तिरूपं सामर्थ्यं स्वाश्रये समवेतानां व्यापाररूपाणां क्रियाणां सिद्धौ साधनम्। कर्मत्वशक्तिरूपं सामर्थ्यं तु स्वाश्रये समवेतानां क्रियत इति कर्मव्युत्पत्त्या फलरूपाणां क्रियाणां सिद्धौ साधनम्। करणत्वादिशक्तिरूपं सामर्थ्यमाश्रयान्तरे स्वाश्रयातिरिक्ते आश्रये समवेतानां क्रियाणां फलरूपाणां व्यापाररूपाणां वा सिद्धौ साधनम्। तत्रापि करणत्वं फलरूपाणां क्रियाणां साधनम्। तथा चोक्तं **भर्तृहरिणा** वाक्यपदीये—

**क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**
**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥**[११]

---

[९] अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुप......वार्तिकमिदं १/४/२३ सूत्रे भाष्ये पठितम्।
[१०] वा०प०-तृ०का०, सा०स०का०सं० १
[११] वा०प० तृ०का०, सा०स०का०सं० ९०

अत्र क्रियाफलम्। सम्प्रदानत्वं तु दातृगतानां व्यापाररूपाणां क्रियाणां साधनम्।

'अश्वात् पतति' इत्यादौ अपादानत्वमपि परसमवेतानां व्यापाररूपाणामेव क्रियाणां साधनम्।

अधिकरणत्वं तु परसमवेतानां फलरूपाणां क्रियाणां साधनम्। तथा चोक्तं भर्तृहरिणा **वाक्यपदीये**

**कर्तृकर्मव्यवहितामक्षात् धारयत् क्रियाम् ।**
**उपकुर्वत् क्रियासिद्धौ प्राञ्चोऽधिकरणं स्मृतम् ॥**[१२]

अत्रोत्तरार्धे क्रियापदेन फलं विवक्षितमिति। '**गुणः साधनम्**'[१३] इति पक्षेऽपि शक्तिरेवात्राधारपार-तन्त्र्यादन्यस्माच्च स्वाश्रयस्य भेदकत्वाद् गुणशब्देनोक्ता भवति यथा नीलो घट इत्यादिस्थले नीलगुणाश्रयेण घटेन पीतगुणाश्रयस्य घटस्य व्यावृत्तिर्भवति तथैव देवदत्तः पचतीत्यादिस्थले देवदत्तकर्तृकारके या कर्तृत्वशक्तिस्तया शक्त्यापि अन्यासां कर्मत्वादिशक्तीनां व्यावर्तनं भवतीति कृत्वा द्वयोरपि इतरव्यावर्तकत्वेन साम्यादाश्रितत्वाच्छक्तिरेव गुणशब्देन गृह्यते। प्रमाणञ्चात्र '**अनभिहिते**' सूत्रस्थं भाष्यमेव तथाहि— 'किं पुनर्द्रव्यं साधनम्, आहोस्विद्गुणः? किं चातः? यदि द्रव्यं साधनं नैतदन्यद्भवत्यभिहितात्। अथ हि गुणः साधनं भवत्येतदन्यदभिहितात्। अन्यो हि सदिगुणः, अन्यश्चासिगुणः। किं पुनः साधनं न्याय्यम् ? गुण इत्याह। कथं ज्ञायते ? एवं हि कश्चित् कञ्चित् पृच्छति क्व देवदत्त ? इति। स तस्मायाचष्टे 'असौ वृक्षे' इति। कतरस्मिन्? यस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वाऽन्येन शब्देनाभिसम्बध्यमानः कर्ता सम्पद्यते। द्रव्ये पुनः साधने सति यत्कर्म, कर्मैव स्यात्, यत्करणं करणमेव, यदधिकरणमधिकरणमेव,'' इत्युक्तं[१४] भाष्ये।

अयम्भावः — 'वृक्षे देवदत्तो वर्तते' इत्यादौ द्रव्यस्य साधनत्वे स्वरूपतो वृक्षस्याधिकरणत्वे तस्यैव वृक्षस्वरूपस्य कर्तृभूते वृक्षपदार्थेऽपि सत्वेन कर्तृत्वन्नोपपद्यते।

शक्तिः कारकमिति पक्षाङ्गीकारे तु शक्तेः भिन्नत्वेन वृक्षे यदाधिकरणत्वशक्तेः विवक्षा तदा 'वृक्षे देवदत्तः' यदा च कर्तृत्वशक्तेः विवक्षा 'तदा वृक्षो वर्तते' इति प्रयोगः सङ्गच्छते। शक्तिश्च समये समये परिवर्तते, यथा अग्नौ दाहकत्वशक्तिः तस्याः दाहकत्वशक्तेश्चन्द्रकान्तमणिसद्भावे तिरोभावो भवति, पुनः सूर्यकान्तमणिसद्भावे आविर्भावो भवति। तथैव वृक्षेऽपि अधिकरणत्वादीनां शक्तीनां नानात्वेन एकत्राधिकरणत्वमेकत्र कर्तृत्वञ्च सिद्ध्यति।

**अत्र पाणिनिसम्मतिः**

'**सप्तमीपञ्चम्यौ कारकमध्ये**'[१५] इति सूत्रयतो भगवतः पाणिनेरपि शक्तिः कारकमित्यत्रैव तात्पर्यम् ।

---

[१२] तत्रैव, का०सं० १४८

[१३] महाभा० पा०सू० २/३/१

[१४] महाभा० पा०सू० २/३/१, पृ०सं० २६०-६१

[१५] पा०सू० २/३/६

प्रकृतसूत्रे कारकशब्दः कर्तृत्वादिशक्तिपरः न तु कर्त्रादिपरः मध्यस्यावधिद्वयसापेक्षत्वात् कारकयोः मध्यमिति विग्रहः, **'कालाध्वनोरत्यन्तसंयोगे'**[१६] इति सूत्रात् 'कालाध्वनोः' इति पदमनुवर्तते, अनुवृत्तस्य कालाध्वनोरित्यस्य पञ्चम्यन्ततया विपरिणामो भवति, अत एवोक्तं भट्टोजिदीक्षितेन प्रकृतसूत्रार्थ-विवेचनावसरे यत् शक्तिद्वयमध्ये यौ कालाध्वनौ ताभ्यामेते स्तः।[१७]

कर्तृशक्त्योर्मध्ये कालवाचकस्योदाहरणम्— 'अद्य भुक्त्वायं द्वयहे द्वयहाद्वा भोक्ता।'

अद्य भुक्त्वा द्वयहे तत्समीपे तृतीयेऽह्नि भोक्तेत्यर्थः। तत्र अद्यतनभुजिक्रियानिरूपितकर्तृत्वस्य द्वयहोत्तरदिनगतभुजिक्रियानिरूपितकर्तृत्वस्य च मध्ये कालवाचकद्वयहशब्दात् सप्तमीपञ्चम्यौ भवतः। कारकशब्दस्य कर्त्रादिपरत्वे तु तस्यैकत्वादिह न स्यात्, अत्र कर्त्रैकत्वे क्त्वा[१] प्रत्ययविधानमेव मानम्। कर्तृत्वशक्तिस्तु कालभेदेन भुजिक्रियाभेदात् भिद्यत एव। तस्मात् शक्तिः कारकमिति पाणिनिसम्मतम्।

**अत्र पतञ्जलिसम्मतिः -**

'सप्तमीपञ्चम्यौ कारकमध्ये'[१८] इति सूत्रस्थभाष्येणापि शक्तेः कारकत्वमभिव्यज्यते। तथा चोक्तं भाष्ये[३] - 'क्रियामध्ये इति वक्तव्यम्, इहापि यथा स्यात्- अद्य देवदत्तो भुक्त्वा द्व्यहाद् भोक्ता, द्व्यहे भोक्ता। कारकमध्य इतीत्युच्यमाने इहैव स्यात्- इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यं विध्यति, क्रोशे लक्ष्यं विध्यति। यं विध्यति यतश्च विध्यत्युभयोस्तन्मध्यं भवति। तत्तर्हि वक्तव्यम् ? न वक्तव्यम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति क्रियामध्यं चेत् कारकमध्यमपि भवति। तत्र 'कारकमध्ये' [१९] इत्येव सिद्धमित्युक्तम्। अत्र द्रव्यस्य कारकत्वे प्रयोगानुपपत्तिस्थले तस्यैकविधत्वेन भेदनिबन्धनो मध्यव्यपदेशो नास्तीति कृत्वा पूर्वपक्षः। पूर्वपक्षवार्तिकप्रत्याख्यानपरभाष्येण शक्तिः कारकत्वमिति पक्षः समायाति, शक्तेः कारकत्वे कालभेदभिनभुजिक्रियानुमितशक्तिभेदाश्रयो मध्यव्यपदेशोऽस्तीति कृत्वा पूर्वपक्षवार्तिकं[२०] प्रत्याख्या-तमिति आरम्भप्रत्याख्यानपरभाष्येण शक्तिः कारकमिति पतञ्जलिसम्मतम्। एवञ्च महर्षिपाणिनि-पतञ्जलिभर्तृहरिमुन्यभिप्रेतत्वेन शक्तिः कारकमिति वैयाकरणानां सिद्धान्तः।

**वामनजयादित्यजिनेन्द्रबुद्धिहरदत्तमतम्**

तत्र वामनजयादित्यादिभिराचार्यैः क्रियानिमित्तत्वमेव कारकत्वमिति स्वीक्रियते। उक्तञ्च

---

[१६] पा०सू० २/३/५

[१७] वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे २/३/७ सूत्रे

[१८] 'समानकर्तृकयोः पूर्वकाले' पा०सू० ३/४/२१ - इत्यनेन समानकर्तृकयोः धात्वर्थयोः मध्ये पूर्वकाले विद्यमानाद्धातोः क्त्वाप्रत्ययो भवति।

[१९] म०भा०पा०सू० २/३/७ पृ० २७१

[२०] क्रियामध्ये इति वक्तव्यम्

कारकशब्दश्च[२१] निमित्तपर्यायः। कारकम्, हेतुरित्यनर्थान्तरम्। कस्य हेतुः? क्रियायाः। एवञ्च क्रियानिमित्तत्वं कारकत्वमिति इति पक्षः समायाति। न्यासेऽप्युक्तं[२२] कारकशब्दोऽयमस्त्येव व्युत्पन्नः— ण्वुलन्तः कर्तृपर्याय इति, अस्ति च सञ्ज्ञाशब्दः अव्युत्पन्नो निमित्तपर्याय इति। तत्रेह पूर्वोक्तस्य ग्रहणं स्यात् तदापादानादिषु कारकशब्दो न वर्तते, यथा कर्तृशब्दः 'ण्वुलतृचौ' इति कर्तरि व्युत्पादितः, तथा कारकशब्दोऽपि, कर्ता च स्वतन्त्रः, अपादानादयश्चास्वतन्त्राः, तत् कथं तेषु कारकव्यपदेशः स्यात् ? असति हि कारकव्यपदेशे कारकसञ्ज्ञकशब्दनेषु तेषां ग्रहणं न स्यात्। अथ तेषामपि कथञ्चिद् स्वतन्त्रताभ्युपेयेत्, एवञ्च तत्र कर्तृसञ्ज्ञा प्रसज्येत्, ततश्च ग्रामादागच्छति, उपाध्याय गां ददातीत्यादौ ग्रामादिभ्यस्तृतीया प्रसज्येत्, इतरेतराश्रयश्चापि दोषः स्यात्। तथाहि कर्तृसञ्ज्ञोत्तरकालं कारकशब्दस्य व्युत्पत्तिः, तस्यां सत्यां कारकशब्दोपक्रमेण कर्तृसञ्ज्ञा स्यात्, बह्वेवं प्रतिविधयं स्यात् प्रतिपदविधाने च प्रतिपत्तिगौरवं स्यात्। निमित्तपर्यायस्य तु कारकशब्दस्य ग्रहणे न दोषः स्यात्, ततः स एव गृह्यत इति। श्रीमता हरदत्तेनापि **पदमञ्जर्याम्** एवमेवोक्तम्।[२३] अत्र निमित्तत्वञ्च साक्षादेव। परम्परयानिमित्तत्वस्वीकारे तु चैत्रस्य तण्डुलं पचतीत्यादावनुमत्यादिप्रकाशनद्वारा चैत्रस्यापि परम्परया क्रियानिमित्तत्वेन कारकत्वापत्तिः। साक्षान्निमित्तता तु कर्तरि तण्डुले च वर्तते, अतः साक्षान्निमित्तत्वस्वीकारे तु नोक्तदोषः। यत्तु नागेशेन **परमलघुमञ्जूषायाम्**—ननु क्रियानिमित्तत्वं कारकत्वमित्यादिना क्रियानिमित्तत्वं कारकत्वं खण्डितं, तत्तु साक्षात्परम्परासाधारणं निमित्तत्वमित्यभिप्रायेणेति बोध्यम्।[२४]

**भट्टोजिदीक्षितमतम्**

भट्टोजिदीक्षितास्तु क्रियान्वयित्वमेव कारकत्वमिति स्वीकुर्वन्ति। कारकेति महासञ्ज्ञया करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयतीति व्युत्पत्तेः।[२५] तथा चोक्तं भट्टोजिदीक्षितेन 'अन्वर्था चेयं सञ्ज्ञा करोतीति कारकमिति, तेन क्रियानन्वयिनः न भवतीति[२६], अतएव 'कारकाणां क्रियान्वय' इति व्यवहारः सङ्गच्छते।

ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ तु ब्राह्मणादीनां तु न कारकत्वं, क्रियान्वयित्वाभावात् उक्तञ्च — **इह हि ब्राह्मणः पुत्रविशेषणं न तु क्रियान्वयि।**[२७]

---

[२१] काशिका पा०सू० १/४/२३, पृ० सं० १३०,
[२२] न्यासः तत्रैव
[२३] निमित्तपर्यायस्यैव ग्रहणमस्त्विति। पदमञ्जरी १/३/२३, पृ० १३१
[२४] प०ल०म०, कारकप्रकरणम्, पृ० २३३
[२५] वै०सि०कौ०,लक्ष्मीटीका, कारकप्रकरणम्, पृ० ७७५
[२६] प्रौढमनोरमा, कारकप्रकरणम्, पृ० ७८३
[२७] तत्रैव।

'कटे शेते' स्थाल्यां पचतीत्यादावधिकरणस्यापि कारकत्वमस्त्येव कर्तृकर्मद्वारा तस्यापि क्रियान्वयित्वात् तस्मात् क्रियान्वयित्वं कारकत्वमिति भट्टोजिदीक्षितसम्मतमस्ति।

ननु क्रियान्वयित्वस्यैव कारकत्वे अक्षेषु शौण्ड इत्यादिस्थले 'अक्षेषु' इत्यत्र कारकत्वानुपपत्तिः। यतो हि तस्य शौण्डेऽन्वयित्वेन क्रियायामन्वयाभावात् यदि परम्परासम्बन्धेन क्रियान्वयित्वमित्युच्यते तदा निरुक्तस्थले दोषाभावेऽपि ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्यापि कारकत्वापत्तिः। अतः साक्षात्क्रियान्वयित्वं कारकत्वमिति तत्स्वरूपं भवितुमर्हति।

अक्षेषु शौण्ड इत्यादिस्थले शौण्डशब्दस्यासक्तशौण्डे लक्षणा। तदनन्तरमासक्तिक्रियारूप-शौण्डपदार्थैकदेशेऽन्वयेन तदुपपत्तिः।

अथ साक्षात्क्रियान्वयित्वरूपकारकत्वस्वीकारेऽपि देवदत्तः पचतीत्यादिस्थले देवदत्तस्य आख्यातकर्तृर्यन्वयेन क्रियायामन्वयाभावात् कारकत्वन्न स्यात् इष्टापत्तौ कृतायां **'सहयुक्तेऽप्रधाने'**[२८] इति सूत्रभाष्यविरोधः तथाहि **'सहयुक्तेऽप्रधाने'** इति सूत्रे अप्रधानग्रहणाभावे **'पुत्रेण सहागतः पिता'** इत्यत्र प्रधानात् पितृपदादपि तृतीयाप्रसङ्गमादाय **'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'** इति परिभाषया प्रथमा भविष्यतीति प्रतिपादितम्। तथा चोक्तम्—'सहयुक्तेऽप्रधानवचनमनर्थकम्। किं कारणम् ? उपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वात्। अन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसी इति प्रथमा भवति।[२९] तत्र प्रथमायाः कारकत्वाभावे निरुक्तपरिभाषया तद्बलीयस्त्वप्रतिपादनमसङ्गतं स्यादतः साक्षात्क्रियान्वयित्वरूपकारकत्वस्वीकारे देवदत्तः पचतीत्यादिस्थले कारकत्वानुपपत्तिः। यदि परम्परया क्रियान्वयित्वं कारकत्वमित्युच्यते तदा ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ क्रियान्वयित्वादलक्ष्ये लक्षणगमनरूपातिव्याप्तिर्दुर्वारा। यदि षष्ठ्यर्थभिन्नत्वमपि विशेषणमुच्यतेऽर्थात् षष्ठ्यर्थभिन्नत्वे सति साक्षात्परम्परया वा क्रियान्वयित्वं कारकत्वमिति तदा निरुक्तस्थले दोषाभावेऽपि 'तण्डुलस्य पाकः' इत्यादौ 'कर्तृकर्मणोः कृतिः' इत्यनेनात्र अनभिहिते कर्मणि षष्ठी तण्डुलकर्मकः पाक इति शाब्दबोधः। अत्र तण्डुलपदार्थस्य वृत्तित्वसम्बन्धेन पच्धात्वर्थफले विक्लित्तावन्वयः। फलस्यानुकूलत्वसम्बन्धेन क्रियायाम्। तथा चात्र क्रियायामन्वयेन सिद्धान्ते कारकत्वव्यपदेशो भवति। षष्ठ्यर्थभिन्नत्वविशेषणदाने तु निरुक्तस्थले षष्ठ्यर्थत्वेन कारकत्वानुपपत्तिः।

यद्यपि कृदुक्तान्यषष्ठ्यर्थभिन्नत्वे सति साक्षात्परम्परया वा क्रियान्वयित्वं कारकत्वमिति स्वीकारे उक्तस्थले दोषाभावस्तथापि कर्मणः शेषत्वविवक्षायां षष्ठ्यां 'सुराणां पाताऽसौ' इत्यादिस्थले कृदुक्तशेषषष्ठ्यर्थेऽतिव्याप्तिः। यदि धात्वर्थेतरान्वयायोग्यत्वं कारकत्वमित्युच्यते। अर्थाद् धात्वर्थेतरस्मिन् यस्यान्वययोग्यता न भवति, तदेव कारकमिति तदा कर्मणः शेषत्वविवक्षायां शेषषष्ठ्यां 'सुराणां

---

[२८] पा०सू० २/३/१९

[२९] म०भा० २/३/१९, पृ० ५०२

पाताऽसौ' इत्यादौ सम्बन्धार्थबोधिकायाः षष्ठ्या 'सुराणामिन्द्रः' इत्यत्र धात्वर्थेतरस्मिन्निन्द्ररूप प्रातिपदिकार्थेऽन्वयाद् धात्वर्थेतरान्वयायोग्यत्वाभावान्न दोष इति तदा द्वितीयाद्यर्थकारके दोषः।

यतोहि 'दण्डं दधातीत्यादौ' यादृशोऽधिकरणादिद्वितीयार्थो[३०] वृत्तित्वसम्बन्धेन धात्वर्थान्वयी तादृशस्यैव अधिकरणादेर्द्वितीयार्थस्य 'अनुदण्डं जातिरित्यादौ' जात्यन्वयात्।

इदन्तात्पर्यं यल्लक्षणद्योत्यज्ञाप्यज्ञापकभावसम्बन्धस्य द्योतकोऽनुरिति वर्तते।

अतो ज्ञाप्यज्ञापकसम्बन्धद्योतकस्यानोः कर्मप्रवचनीयसञ्ज्ञायां[३१] तद्योगे द्वितीया।[३२]

अत्र निरुक्तद्वितीयार्थस्य धात्वर्थेतरस्मिन् जातिरूपनामार्थेऽन्वयाद् धात्वर्थेतरान्वयायोग्यत्वाभावाद् 'दण्डं दधातीत्यादौ' कारकत्वानापत्तिः।

अपादानाद्यन्यतमत्वं कारकत्वमित्यपि वक्तुं न शक्यते। यतोहि[३३] ध्रुवत्वासोढत्वादिभेदेन तस्य बहुविधत्वान्निरुक्तान्यतमत्वस्य ज्ञानं सर्वथाऽसम्भवमेव। ध्रुवत्वाद्यन्यतमत्वेनापादानस्य निरूपणं कृत्वा तावदन्यतमत्वेन कारकत्वस्य स्वरूपं स्वीकृतं यदि स्यात्तदा कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहानापत्तिः। तथाहि—अन्यतमत्वस्य तद्भिन्नभिन्नत्वरूपतया प्रतियोगिज्ञानं विना अपादानादिभेदस्य ज्ञानसम्भवमिति कृत्वा तदन्यतमत्वस्य नितरां दुर्ग्रहत्वाद्।

अतो नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकधर्मत्वे सति पदान्तरासमभिव्याहृतसुबर्थत्वं कारकत्वमिति निष्कृष्टलक्षणम्।[३४] अत्र धर्मे नामार्थान्वयप्रयोजकतानवच्छेदकीभूतविशेषणदाने 'कान्तस्य त्रस्यतीत्यादौ' शेषषष्ठ्याः न कारकत्वम्। यतोहि निरुक्तस्थलीयसम्बन्धत्वस्य 'कान्तस्य मुखमित्यादौ' नामार्थान्वयप्रयोजकतावच्छेदकत्वेन अनवच्छेदकत्वविरहेण क्रियान्वयितावच्छेदकधर्मवत्वेऽपि न कारकत्वम्। यद्यपि धर्मे नामार्थान्वयाप्रयोजकत्वरूपविशेषणदानेनापि दोषनिराकरणं सम्भाव्यते, तथापि 'व्याघ्राद् विभेतीत्यादौ' हेतुतादेः कारकत्वस्याव्यापनात्, 'व्याघ्रस्य भयमित्यादौ' शेषषष्ठ्यां नामार्थान्वयित्वान्निरुक्तहेतुत्वरूपापादानकारकेऽव्याप्तिः स्पष्टैव।

अनवच्छेदकत्वविवक्षणे तु हेतुत्वस्य सम्बन्धत्वेन रूपेण नामार्थान्वयित्वेऽपि हेतुतात्वेन रूपेणानन्वयान्न दोषः। अतो हेतुतात्वस्य नामार्थान्वयप्रयोजकतानवच्छेदकीभूत-

---

[३०] द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। वै०भू०सा०, सुबर्थनिर्णयः, पृ० २१७

[३१] अनुर्लक्षणे पा०सू० १/४/८४ इत्यनेन कर्मप्रवचनीयसञ्ज्ञायाम्।

[३२] कर्मप्रवचनीययुक्ते द्वितीया

[३३] ध्रुवमपायेऽपादानम् पा०सू० १/४/२४; पराजेरसोढः पा०सू० १/४/२६

[३४] कारकचक्रम्, प्रदीपटीका, पृ० ३

क्रियान्वयितावच्छेदकत्वेन पदान्तरासमभिव्याहृतत्वेन च कारकत्वं सङ्घटत एव। एतदभिलक्ष्यैव कर्तृत्वादिकारकस्य कृदन्तार्थे कर्तृत्वादिनाऽन्वयार्थं विशेषवचनं[35] प्रतिपादितम्। अन्यथा शेषत्वेन कर्तृत्वादिकारकस्य कृदन्तार्थेऽन्वयसम्भवे पृथक् सूत्रारम्भस्य वैयर्थ्यापत्तेः।

कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय निरुक्तस्थले सुबर्थत्वमुक्तम्। एतल्लक्षणं प्राचां भट्टोजिदीक्षितप्रभृतिवैयाकरणानामिति सुधीभिराकलनीयम्।

**नागेशभट्टमतम्**

**नागेशभट्टास्तु—क्रियानिष्पादकत्वं कारकत्वमिति स्वीकुर्वन्ति।**[36]

तत्र निष्पादयत्युत्पादयतीति व्युत्पत्त्या निष्पादको जनकः। एवञ्च क्रियाजनकत्वमेव कारकत्वमिति लभ्यते। तथा चोक्तं नागेशेन 'कारकत्वं क्रियाजनकत्वम्, भाष्ये करोति क्रियां निर्वर्तयतीति व्युत्पत्तिप्रदर्शनात्।'[37] तत्र जनकत्वं कारणत्वरूपम्। कारणत्वञ्च अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वम्।[38]

एवञ्च क्रियाक्रियानिष्ठकार्यतानिरूपितकारणतावत्वं कारकत्वमिति लभ्यते। 'चैत्रस्य तण्डुलं पचति', 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ' चैत्रब्राह्मणादीनां न कारकत्वमन्यथासिद्ध[39]त्वेन क्रियाजनकत्वाभावात्। तथा चोक्तं नागेशेन— 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वम्। पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्[40]। ननु 'नटस्य श्रुतम्' इत्यत्र नटस्यापि कारकत्वापत्तिः, यतो हि गीतद्वारा तस्यापि क्रियाजनकत्वात्। तथा च 'कारकाद्दत्तश्रुतयोरेवाशिषि'[41] इत्यनेन स्वरापत्तिरिति चेदुच्यते कारकादत्तश्रुतयोरेवाशिषि' इति कारकशब्दः स्वर्यते। तेन कारकाधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते। षष्ठ्याः कारकाधिकारबहिर्भूतत्वात् नोक्तदोषः।

एवञ्च कारकाधिकारपठितत्वे सति क्रियाजनकत्वं कारकत्वमिति निष्कृष्टलक्षणं सम्पद्यते।

ननु क्रियाजनकत्वस्यैव कारकत्वे पटं करोति घटं स्मरतीत्यादौ पटस्य क्रियोत्तरकालिकत्वेन क्रियाजनकत्वाभावात् 'घटे' च स्मरणजनकत्वासम्भवादुक्तवाक्य घटपटयोः कारकत्वं न स्यादिति चेदुच्यते तन्तुनिष्ठजनकत्वस्य पट आरोपात् कारकत्वं सङ्घटते, घटेऽपि सम्बन्धिनिष्ठजनकत्वस्य घट आरोपेण दोषाभावात् अथवा वैयाकरणनिकाये बौद्धार्थस्यैव पदशक्यत्वेन शाब्दबोधविषयो भवति।

[35] 'कर्तृकर्मणोः कृतिः' पा०सू० २/३/६५
[36] प०ल०मं०, कारकप्रकरणम्, पृ० २२३
[37] ल०श०शे० कारकप्रकरणम्, पृ० ४३४
[38] न्या०सि०मु०, अन्यथासिद्धनिरूपणम्, पृ० ८५
[39] पञ्चसु अन्यथासिद्धेष्वयं चतुर्थः यथा घटं प्रति कुलालपितुः न कारणत्वम्।
[40] ल०श०शे० का०प्र० पृ० ४३४
[41] पा०सू० ६/२/१४८

बाधोत्तरमपि बौद्धज्ञानैः शब्दज्ञानरूपो व्यवहारः क्रियते। अत एव एष बन्ध्यासुतो याति[४२] इत्यादिप्रयोगाः सङ्गच्छन्ते। तद्बोधतात्पर्येणैव च शब्दानामुच्चारणं भवति। एवञ्च 'कर्मणि द्वितीया' इत्यादिसूत्राणां क्रियाजनककर्मादिरूपार्थविषयकबोधतात्पर्येणोच्चारितात् घटादिपदात् द्वितीयाविभक्तिः भवतीत्यर्थः। सूत्राणां प्रवृत्तिविषयतापि तत्तद्बौद्धार्थरूपरुषिते बाह्यार्थे एवञ्च 'घटं करोती'त्यादौ बाह्यार्थाभावेऽपि बौद्धार्थस्य क्रियाजनकत्वान्न कारकत्वहानिः। बौद्धार्थस्य क्रियाजनकत्वे बाह्यार्थे जनकत्वव्यवहार आरोपेणैवोपपदनीय इति। तथा चोक्तं श्रीमता नागेशेन 'घटं करोति, स्मरतीत्यादौ' बौद्धघटादेः पूर्वकालत्वेन स्मृत्यादिनिष्पादकत्वं बोध्यम्।[४३]

सम्प्रदानस्य त्वनुमतिप्रकाशनद्वारा क्रियाजनकत्वात् कारकत्वं सम्भवत्येव।

तथाहि—अनुमति सत्वे दानस्य प्रवृत्तिः अनुमत्यभावे दानप्रवृत्यभावः, इत्यन्वयव्यभिचाराभ्यां सम्प्रदानस्य दानप्रवृत्तिं प्रत्यनुमतिप्रकाशनद्वारा कारकत्वं स्वीक्रियत एवेति न कारकत्वानुपपत्तिः।

ननु यत्र सम्प्रदानं नास्ति (जनिष्यमाण पुत्राय गां ददाति) तत्र सम्प्रदानानुपस्थिति-दशायामनुमतिप्रकाशनाभावे क्रियाजनकत्वाभावेन कारकत्वानुपपत्तिः, अनुमतिप्रकाशनद्वारैव सम्प्रदानस्य कारणात्वादिति चेदुच्यते तादृशसम्प्रदानस्यापि दानकर्तुर्बुद्धिस्थत्वावश्यकत्वेन विषयविधया तस्यापि तज्जनकत्वात् तथा चोक्तं नागेशेन 'आसन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालत्वेनैव जनकत्वम्'[४४] इति।

उद्योतेऽप्युक्तम्—सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोध्यम्।[४५] एवमेव स्तोकं पचतीत्यादौ फलस्यापि कारकत्वात् कर्मत्वमुपपन्नम्।

एवमधिकरणकारकस्यापि 'कटे आस्ते' इत्यादौ स्थितिं प्रति कारणत्वात् क्रियाजनकत्वेन कारकत्वमस्त्येव। कारकाणाञ्च क्रियायामेवान्वयः, क्रियायाः तज्जनकरूपकारकस्य च परस्परं साकाङ्क्षत्वात् तथा चोक्तम् नागेशेन—'अत एवैषां क्रियायामेवान्वयः। क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाऽदयेन क्रियायाः जनकाकाया च तत्रैवान्वयस्यौचित्यात्'।[४६] न च क्रियाशब्दस्य प्रधानक्रियायां मुख्यत्वेन कर्मादिकारकाणां प्रधानक्रियाऽनिर्वर्तकत्वात् कथं तेषां कारकत्वमिति चेदुच्यते सर्वेषां कारकाणां स्वस्वान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वात् कारकत्वोपपत्तेः।

---

[४२] एष वन्ध्यासुतो याति खपुष्पकृतशेखरः। कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।। प०ल०मं०,शक्तिविचारः। पृ० २९

[४३] ल०श०शे०, कारकप्रकरणम्, पृ. ४३४

[४४] ल०श०शे० कारकप्रकरणम्, पृ० ४३४

[४५] म०भा०, उ० १/४/२३, पृ० २४२

[४६] ल०श०शे०, का०प्र० पृ० ४३४

न चैवमपि सर्वेषां कारकाणां स्वस्वक्रियाजनने स्वातन्त्र्यात् कर्मण: कर्तृसञ्ज्ञाऽपि प्राप्नोति वाच्यम्। **'स्वतन्त्र: कर्ता'** इति सूत्रे 'कारके' इत्यस्य सम्बन्धेन स्वातन्त्र्य उक्तरूपात्मके लब्धे पुन: स्वतन्त्रपदोपादानं यस्य स्वातन्त्र्यमेव न तु पारतन्त्र्यमपीति तद्व्यावृत्यर्थमित्याशयात्।[४७] न चैवमपि कारकशब्दस्य कर्तरि ण्वुला कर्तृपर्यायत्वेन 'कारकं करणम्' इत्यादिविरुद्धम्, 'कारकं कर्ता' इति च पुनरुक्तं स्यादिति चेदुच्यते—

**निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।**
**व्यापारभेदापेक्षायां करणादित्वसम्भव: ॥**[४८]

इति हर्युक्ते। सर्वेषां स्वस्वव्यापारद्वारा स्वातन्त्र्येणैव क्रियाजनकत्वात् कर्तृत्वेन कारकत्वम्। तत: क: ? केन किं पचतीति विवक्षायां स्वस्वव्यापारवशेन करणादित्वमिति नोक्तदोषद्वयम्। तस्मात् क्रियाजनकत्वं कारकत्वमिति नागेशसम्मतम्।

**मौनिश्रीकृष्णभट्टमतम्**

मौनिश्रीकृष्णभट्टेन कारकं सञ्ज्ञापरत्वेनैव प्रतिपादितम्। किं नाम कारकत्वमिति प्रतिपादयता तेनोक्तम्— सङ्केतविशेषसम्बन्धेन कारकपदवत्वम्। भाष्ये 'कारके' इत्यस्य सञ्ज्ञापरत्वेनैव व्यवस्थापनात्। तथा **'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति'** इत्यत्र ब्राह्मणस्य सञ्ज्ञा कुतो न भवतीत्याशङ्क्याकथितशब्दोऽसङ्कीर्तिते वर्तते। केनासङ्कीर्तितम् ? अपादानविशेषकथाभि: तथा च विप्रयोगस्यापि विशेषावगतिहेतुत्वादन्वर्थसञ्ज्ञाविज्ञानाद्वा ब्राह्मणस्य न भवति सञ्ज्ञेत्युक्तम्।[४९]

श्रीमौनिकृष्णभट्टेनेदमपि स्पष्टं भणितं यद् यद्यपि महाभाष्ये **'कारके'**[५०] इति सूत्रं क्रियापरत्वेनापि व्याख्यातम्, तथापि तद् व्याख्यानन्तु अकथितशब्दस्याप्रधानपरत्वे वर्तते। अकथितशब्दस्याप्रधानपरत्वं तु सिद्धान्ते व्यवस्थापितं नास्ति। अत: **'कारके'** इत्यस्य क्रियापरत्वेन व्याख्यानं भाष्यासम्मतम्। तथा चोक्तं मौनिकृष्णभट्टेन यद्यपि अथवेत्यनेन क्रियायामित्यर्थकत्वेनापि 'कारके' इति सूत्रं व्याख्यातम् एवं सप्तम्यप्युपपन्ना तथाप्यकथितशब्दस्याप्रधानपरत्वे तद् व्याख्यानम्। न चाप्रधानत्वं सिद्धान्ते स्थितम्। तेन क्रियायामित्यर्थकत्वेन व्याख्यानं भाष्यासम्मतमिति निश्चीयते।[५१]

वस्तुतस्तु युक्तायुक्तत्वविचारे मन्मते धातुवाच्यसाध्यभूतक्रियोत्पत्त्यनुकूलव्यापाराश्रयत्वं कारकत्वमिति सुस्पष्टं कारकस्वरूपं दृष्टिपथमायाति। तथाहि— भाष्ये 'सामान्यभूताक्रिया वर्तते तस्या

---

[४७] प्रौढमनोरमा, भैरवीटीका, पृ० ७८७
[४८] वा०प० सा०स०का०सं० - १८
[४९] लघुविभक्त्यर्थनिर्णय:, पृ० २२
[५०] ४. पा०सू० १/४/२३
[५१] लघु०वि०नि० पृ० २२, कारकचक्रम्, प्रदीपटी०, पृ०३

निर्वर्तकं कारकमिति [52] कारकस्वरूपमभिहितम्।

क्रियानिर्वर्तकं कारकमित्यस्य क्रियोत्पादकं कारकमित्यर्थः। क्रियोत्पादकत्वञ्च क्रियोपत्त्यनुकूलव्यापाराश्रयत्वम्। क्रिया च व्यापारः। क्रियाशब्देन रूढ्या व्यापारस्यैव ग्रहणात्। व्यापारश्च धातुवाच्य एव साध्यभूतः। एवञ्च धातुवाच्यसाध्यभूतव्यापारोत्पत्त्यनुकूलव्यापारवत्वं कारकत्वमिति निष्कर्षः। यथा प्रधानेन कर्त्रासमवाये पच्धात्वर्थव्यापारः अधिश्रयणोदकासेचन-तण्डुलावपनैधोऽपकर्षणाद्यवयवकलापः, तदुत्पत्त्यनुकूलो व्यापारश्चैत्रादिके कर्तरि मनोव्यापारो यत्नरूपः, तदाश्रयत्वात् कर्तुः कारकत्वम्। एवमधिश्रयणाद्युत्पत्त्यनुकूलो व्यापारः कर्मणि तण्डुलादौ विक्लित्तिधारणम्, करणे काष्ठादौ ज्वलनम्, अधिकरणे स्थाल्यादौ सम्भवनधारणादिकम्, तत्तदाश्रयत्वात्तेषां सर्वेषां कारकत्वम्। अधिश्रयणादीनां सौकर्यद्योतनार्थमविवक्षायां प्रधानकर्तृव्यवाये तु स्थालीरथव्यापारस्य पच्धातुवाच्यत्वविवक्षायां स्थाली पचतीत्यत्र पच्धात्वर्थो धारणरूपो व्यापारः, तदुत्पत्त्यनुकूलो यत्नरूपो मनोव्यापारः स्थाल्यामारोपितः तदाश्रयत्वात् स्थाल्याः कारकत्वं स्थाली पचतीत्यत्रारोपितचैतन्यस्य भानात्। 'उत्पत्स्मानब्राह्मणाय गां ददातीत्यादौ' असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकतया स्वबुद्धिपूर्वकालत्वेनैव बुद्धिविषयीभवनव्यापारेण क्रियोत्पत्त्यनुकूल-व्यापारवत्वं बोध्यम्। तथा चोक्तं श्रीमता नागेशभट्टेन— **'तत्र क्रियानिष्पादकत्वं कारकत्वम्'**, तच्च कर्त्रादीनां षण्णाम[53] पीतीति कारकस्वरूपविमर्शः।

दिनेशकुमारद्विवेदी
शोधच्छात्रः, व्याकरणविभागः,
संस्कृतविद्याधर्मविज्ञानसङ्कायः,
काशीहिन्दूविश्वविद्यालयः,वाराणसी

[52] म०भा०, पा०सू० १/४/२३
[53] प०ल०म०, कारकप्रकरणम्, पृ० २२३